M. T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref. Ser. 1145
Title: Santi Stava

1145

Complete

S'antēstava

		Title
		Author
		Editor
		Year, Vols.
		Publisher
1145		Remarks

अथशांतिस्तवः जयंतुदेव्योहरपादपंकजंत्रस
न्नधामामृतमोक्षदायकं अनंतसिद्धांतगतिप्र
बोधकं नमामिचाष्टाष्टकयोगिनीकुलं १ यो
गिनीचक्रमध्यस्थंमातृमंडलवेष्टितं नमामि
शिरसानाथंभैरवंभैरवीप्रियं २ अनादिघो
रसंसारव्याधित्वंसैकहेतवे नमःश्रीनाथवैद्या
यभवौषधविधायिने ३ आपदोदुरिरोगसम
याचारलंघनात् तेसर्वेमेव्यपोहंतुदिव्यचक्रस्य
मेलनात् ४ संपूजकानांपरिपालकानांयतें
द्रियाणांचतपोधनानां देशस्यराष्ट्रस्यकुलस्य

ग

राज्ञां करोतु शांतिं भवान्कुलेशः ॥ ५ नंदंतु षड्विध
कुलान्वयदर्शनाये सिंहासनाध्युषितशक्तमहान्वया
ये नंदंतु सर्वकुलकौलरताः पराये चान्ये विशेषपदसाधक
शांभवाये ६ नंदंतु सिद्धगुरवस्तदनुक्रमोद्याज्येष्ठानुगाः
समयिनो बटुकाः कुमार्यः षड्योगिनीप्रवरवीरकुले
प्रसूता नंदंतु मुनिपतिगोद्विजसाधुलोकाः ७ नंदंतु नी
तिनिपुणा निरवद्यनिष्ठा निर्मत्सरा निरुपमा निरुपद्र
वश्च नित्यं निरंजनरता गुरवो निराहाः शांताश्च शां
तमनसो हृतशोकशंकाः ८ नंदंतु योगनिरता कुल
योगनिष्ठा आचार्यसाव्ययिकसाधकपुंगवाये
गौवोद्विजायुवतयो यतयः कुमार्यो धर्मरमंत्व
विचला गुरुभक्तिनिष्ठाः ९ नंदंतु साधककुला

न्यणिमादिसिद्धाः शापाः पतंतु समयद्विषि योगि
नीनां साशांभवी स्फुरतु कापि ममाप्यवस्था यस्यां
गुरोश्चरणपंकजमेव लभ्यं १० नंदंतु कुलयोगिन्यो
नंदंतु कुलपुत्रकाः नंदंतु ये कुलाचार्याये चान्ये कु
लदीक्षिता ११ नंदंतु साधकाः सर्वे विनश्यंतु प्रदू
षकाः अवस्था शांभवी मेस्तु प्रसन्नास्तु गुरुः सदा
१२ यद्येषा भैरवी शक्तिर्यदि भैरवशासनं यद्येष
धर्मश्रुतिषु नश्यंतु कुलदूषकाः १३ अनंतकुलशा
स्त्राणां सिद्धांतं प्रतिनिर्मलं अष्टाष्टकनमस्का
रो महासिद्धिफलप्रदः १४ तृप्यंतु मातरः सर्वा
भैरवाष्टकमिश्रिताः सर्वाभरणसंपन्नाः
प्रोत्तुंगनवयौवनाः १५ अन्योन्यालिंगिताः

सर्वामुक्तकेशादिगंबराः क्षोभयंतुजगत्सर्वंमम
देहेव्यवस्थिताः १६ येकुलेदक्षिणेवामेनरानिंदं
२ तिनित्यशः संततिछेदनंतेषांयातुगोत्रंसमुच्छिदं
१७ नंदंतुतेनराःसर्वेपुत्रपौत्रधनावृताः पुष्पैर्धू
पैर्बलैर्दानैर्यशोददतुमातरः १८ विद्येविकल्पर
हितेविमलेविशाकेवीणाविनोदिनिविलासि
निविश्वमातः विंध्याद्रिवासिनिविशोकयमा
विनीतंकारुण्यपूर्णनयनेकरुणांकुरुष १९ तृ
प्यंतुमातरःसर्वाःसमुद्राःसविनायकाः क्षेत्र
पालाश्चयोगिन्योममदेहेव्यवस्थिताः २० २
याश्चक्रक्रमभूमिकावसतयोनाडीषुयाःसं

स्थितायाःकायोद्गमरोमकूपनिलयायाःसंस्थि
ताधातुषु उच्छ्वासोर्मिमरुत्तरंगनिलयानिश्वा
सवाताश्रयास्तादेव्यः परिपंथिभक्षणरतास्तृप्य
तुकौलार्चिताः २१ यासमाज्ञाप्रभावेणसुस्थि
तंभुवनत्रयं नमस्ताभ्यःसमस्ताभ्योयोगिनीभ्यो
निरंतरं २२ शिवाद्यवनिपर्यंतंब्रह्मादिस्तंबसं
युतं कालाग्न्यादिशिवांतंचजगद्यज्ञेनतृप्यतु २३
श्रीमच्चंद्रपुरंविहारभुवनंपुर्णीकृतंलीलया
शिष्याणांचसपादलक्षगणितंनीतंपदंखेचरं
तन्मध्येनवकंतुभूमिपतिनाराज्ञासमाकर्षितं
तंवंदेभवघोरदुःखशमनंश्रीआदिनाथंप्रभुं २४

३

नित्यमेतत्पठेत्स्तोत्रंपूजांतेसाधकस्तुयः शां
तिःश्चसर्वपापेभ्यः सर्वपापनिकृंतनं २५ व्या
धयस्तस्यनश्यंतिजीवेदब्दशतंसुखी विहृत्य
भुवनेस्वैरंसोमश्चमवाप्नुयात् २५ इतिशां
तिस्तवः

शके १७०७ विश्वावसु संवत्सर वैशाख बहुल ३
दिवसीं वे ॥ बरवे यांस रा ॥ नाईकोजीनाईक या
चापये चा शक हा हेतवे जगत
हेतवेजगतामेवर

३